# ॥ सीताकृतं वह्न्यष्टकम् ॥

नमस्यामि महायोगं कृतान्तं गहनं परम् ।

दाहकं सर्वभूतानामीशानं कालरूपिणम् ॥ १ ॥

नमस्ये पावकं देवं साक्षिणं विश्वतोमुखम् ।

आत्मानं दीप्तवपुषं सर्वभूतहृदि स्थितम् ॥ २ ॥

प्रपद्ये शरणं वह्निं ब्रह्मण्यं ब्रह्मरूपिणम् ।

भूतेशं कृत्तिवसनं शरण्यं परमं पदम् ॥ ३ ॥

ॐ प्रपद्ये जगन्मूर्तिं प्रभवं सर्वतेजसाम् ।

महायोगेश्वरं वह्निमादित्यं परमेष्ठिनम् ॥ ४ ॥

प्रपद्ये शरणं रुद्रं महाग्रासं त्रिशूलिनम् ।

कालाग्निं योगिनामीशं भोगमोक्षफलप्रदम्॥ ५॥

प्रपद्ये त्वां विरूपाक्षं भूर्भुवःस्वःस्वरूपिणम्।

हिरण्मये गृहे गुप्तं महान्तममितौजसम्॥ ६॥

वैश्वानरं प्रपद्येऽहं सर्वभूतेष्ववस्थितम्।

हव्यकव्यवहं देवं प्रपद्ये वह्निमीश्वरम्॥ ७॥

प्रपद्ये तत्परं तत्त्वं वरेण्यं सवितुः स्वयम्।

भर्गमग्निपरंज्योती रक्ष मां हव्यवाहन॥ ८॥

- कूर्म पुराणम्

||sītākṛtaṁ vahnyaṣṭakam ||

namasyāmi mahāyogaṁ kṛtāntaṁ gahanaṁ param |

dāhakaṁ sarvabhūtānāmīśānaṁ kālarūpiṇam || 1 ||

namasye pāvakaṁ devaṁ sākṣiṇaṁ viśvatomukham |

ātmānaṁ dīptavapuṣaṁ sarvabhūtahṛdi sthitam || 2 ||

prapadye śaraṇaṁ vahniṁ brahmaṇyaṁ brahmarūpiṇam |

bhūteśaṁ kṛttivasanaṁ śaraṇyaṁ paramaṁ padam || 3 ||

om prapadye jaganmūrtiṁ prabhavaṁ sarvatejasām |

mahāyogeśvaraṁ vahnimādityaṁ parameṣṭhinam || 4 ||

prapadye śaraṇaṁ rudraṁ mahāgrāsaṁ triśūlinam |

kālāgniṁ yogināmīśaṁ bhogamokṣaphalapradam || 5 ||

prapadye tvāṁ virūpākṣaṁ bhūrbhuvaḥsvaḥsvarūpiṇam |

hiraṇmaye gṛhe guptaṁ mahāntamamitaujasam || 6 ||

vaiśvānaraṁ prapadye'haṁ sarvabhūteṣvavasthitam |

havyakavyavahaṁ devaṁ prapadye vahnimīśvaram || 7 ||

prapadye tatparaṁ tattvaṁ vareṇyaṁ savituḥ svayam |

bhargamagniparañjyotī rakṣa māṁ havyavāhana || 8 ||

- kūrma purāṇam